# Shri Shankara Stotram 2

# श्रीशङ्करस्तोत्रम् २

## Document Information

Text title : Shri Shankara Stotram 2

File name : shankarastotram2.itx

Category : shiva, vAsudevAnanda-sarasvatI

Location : doc_shiva

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# श्रीशङ्करस्तोत्रम् २

ॐ कारवाच्य सकलार्चितपादपद्म
न ष्टस्वकष्ट तव नौमि सुभद्रसद्म ॥

म त्तारिहन्तृचरणं शरणं सदाप्ता-
स्ते भूय ईश जननीजठरं न चाप्ताः ॥ १॥

अ हं त्वदर्चाविधिं न जाने
स्तु त च गिरिजासूनु जाने ॥

भ क्तिस्त्वयीशे न दृढा ममास्ति
ग रिष्ठसत्सङ्ग उतापि नास्ति ॥ २॥

वन दे पदे ते भुवनाधिराज
वि द्याधिराजाप्यमृताधिराज ॥

श्वे तद्युते भक्तपते नमस्ते
श्व भ्राड्झटित्युद्धर मां भवाख्यात् ॥ ३॥

रा जासुराणां त्वमभीष्टदाता
य द्यप्यहो सिद्धनिधिप्रदाता ॥

म हाश्मशाने नृकरोटिमालां
हा र्देन धृत्वा प्रकरोषि लीलाम् ॥ ४॥

दे वाङ्गलेपनमुतापि चिताविभूतिर्
वा हो वृषः सहचरास्तव भूतवाराः
य स्याङ्कुशं त्वगशिवापि शिवापि तेऽस्ति
त्रि ष्वीशितः पितृवने सवनेऽपि वासः ॥ ५॥

यं ताखिलस्येदृश ईश तेऽपि
ब लारिमुख्या अमरा हि तेऽपि

का शीश जानन्ति परं न तत्त्वं
य स्येश मां चानुगृहाण स त्वम् ॥ ६॥

त्रि विक्रमोऽप्यब्जभ्जभवश्च लिङ्गं
पु रा परिच्छेत्तुमनीश्वरौ ते ॥

रु द्रेद्दशस्ते गुणवर्णनाय
षा ण्मातुरे भास्य गुरो प्रभुः कः ॥ ७॥

य स्त ईश परिकीर्तयेद्गुणान्
त्रि ष्वपीह सवनेषु भक्तिमान् ॥

पु ण्यवानिह भवेत्तथा नरो
रां कवाम्बरधरोऽपि नापरः ॥ ८॥

त पो जपो यज्ञमुखा क्रिया या
का चित्प्रमादाद्विकला यदि स्यात् ॥

य न्नामसङ्कीर्तनतः सुपूर्णा
त्रि दृग्भवेत्त्वां तमजं गृणामि ॥ ९॥

का लो मृकण्डात्मजमर्कचन्द्रमोऽ-
ग्नि नेत्रं नेतुं समुपागतस्तदा ॥

का लान्तकागच्छशिवेत्यहो तदाऽऽ-
ला पश्रुतेस्त्वं तमु मुक्तवानसि ॥ १०॥

य स्मै सकृन्नमश्चक्रे बाणरावण आसुरः ।
का मपूर्तिस्तयोरासीत्सम्पद्देवश्रियोऽधिका ॥ ११॥

ला भोऽपरो नश्वर एव कामोऽ-
ग्नि वद्धृतेनेश न कामभोगैः ॥

रु द्रोप्रशाम्यत्यत एव देहि
द्रा क्शान्तिदां त्वय्यचलां सुभक्तिम् ॥ १२॥

य त्वं विना दुःखमपैति यद्वत्
नी रागमप्येति सुखं च तद्वत् ॥

ल ब्धुं यते तन्न वृणोमि चार्थं
कं चित्त्वयीशार्पय भक्तिमेकाम् ॥ १३॥

ठा ये विदा तानपि भक्तियोगो
य थानुगृह्णाति तथा परो नो ॥

स वेंऽपि यस्मादिह पावनाः स्यु-
र्वे दाः प्रमाणं त्विह संशयो नो ॥ १४॥

श्व पाकमुख्या अपि यस्य भक्त्या
रा जन्त ईशान तवैव लोके ॥

य ह्रेश चण्डालसुतापि याता
स तीं गतिं विश्रुतमेतदस्ति ॥ १५॥

दा रात्मजागारधनादि सर्वं
शि वेह सन्न्यस्य सदा भजन्ति ॥

वा मं परं त्वां मुहुरत्र ते किं
य मीश मृत्यूद्भवदुःखभाजः ॥ १६॥

श्री कण्ठ सूर्येन्दुपयोनभोऽग्नि-
म रुद्धरात्मान इमास्तनूस्ते ॥

हा लाहलादानिशमानतोऽस्मि
दे वाधिदेवेश्वर मे प्रसीद ॥ १७॥

वा ताशनोपवीतो
य उ पञ्चास्यस्त्रिलोचनो नग्नः ॥

न न्दिगतो दशहस्तो
मः केस्य स पातु मुन्मग्नः ॥ १८॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं श्रीशङ्करस्तोत्रं सम्पूर्णम् ।

*Shri Shankara Stotram 2*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*